# बोर्ड कृतिपत्रिका : मार्च २०२०

## आनन्द: (संयुक्त - संस्कृतम्)

**अवधि: होराद्वयम्** **गुणाङ्का: 40**

**सूचना:**

(1) सूचनानुसारेण आकृतय: आरेखितव्या:।

(2) आकृतीनाम् आलेखनं मसीलेखन्या कर्तव्यम्।


(3) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।

(4) लेखनं सुवाच्यं, स्पष्टं लेखननियमानुसारं च भवेत्।


### प्रथम: विभाग:- सुगमसंस्कृतम्। (6)

**1. अ. चित्रं दृष्ट्वा नामानि लिखत। (4 त: 3)** [3]

1) 

2) 

3) 

4) 

**आ. सङ्ख्या: अक्षरै: / अङ्कै: लिखत। (3 त: 2)** [2]

1. नवविंशति: 2. ५३ 3. शतम्

**इ. समय-स्तम्भमेलनं कुरुत।** [1]

| क्र. | अ | आ |
|---|---|---|
| 1. | विंशत्यधिक-दशवादनम् | ५.५० |
| 2. | पादोन-अष्टवादनम् | १०.२० |
| | | ७.४५ |

### द्वितीय: विभाग:- गद्यम्। (14)

**2. अ. गद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत।** [4]

भारतस्य दक्षिणदिशि केरलप्रदेशे आलुवा नगरस्य समीपं 'कालडि' नाम ग्राम:। स: ग्राम: पूर्णानदीतीरे वर्तते। तत्र जगद्गुरो: शङ्कराचार्यस्य जन्म ख्रिस्ताब्दे अष्टमे शतके अभवत्। तस्य पिता शिवगुरु: माता आर्याम्बा चास्ताम्। बाल्ये एव तस्य पिता शिवगुरु: दिवङ्गत:। तस्माद् मातैव पुत्रस्य पालनम् अकरोत्। पञ्चमे वयसि उपनीत: स: पठनार्थं गुरुमुपागच्छत्। तत्र वेद-वेदाङ्गानि, विविधशास्त्राणि च असाधारणवेगेन बालकोऽयम् अधीतवान्। पठनादिकं समाप्य शङ्कर: गृहं प्रत्यागतवान्। गृहं प्राप्य मातृसेवाम् आरभत च। माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म। परन्तु मनसा वचसा कर्मणा च विरक्त: शङ्कर: संन्यासार्थम् अनुमतिं प्रार्थयत। शङ्करस्य ऐहिकविषयेषु अरुचिं दृष्ट्वा आर्याम्बा चिन्तामग्ना जाता।

**1. अवबोधनम्। (3 त: 2)** 2

**क. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।** 1

शङ्करस्य मातैव पुत्रस्य पालनम् अकरोत् यत: ..................।

(1) शङ्कराय केवलं माता अरोचत।

(2) बाल्ये एव तस्य पिता शिवगुरु: दिवङ्गत:।

**ख. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत।** 1

पञ्चमे वयसि उपनीतः शङ्कर पठनार्थं गुरुमुपागच्छत्।

**ग. एषः गद्यांशः कस्मात् पाठात् उद्धृतः?** 1

**2. शब्दज्ञानम्। (3 तः 2)** **2**

**क. गद्यांशात् 2 पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्यये चित्वा लिखत।** 1

**ख. गद्यांशात् विशेषण-विशेष्ययोः मेलनं कुरुत।** 1

| ‘अ’ | ‘आ’ |
|---|---|
| (1) शिवगुरुः | चिन्तामग्ना |
| (2) आर्याम्बा | दिवङ्गतः |
| | विरक्तः |

**ग. पूर्वपदं / उत्तरपदं लिखत।** 1

(1) चास्ताम् = .............................. + आस्ताम्।

(2) बालकोऽयम् = बालकः + ..............................।

**आ. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** [4]

अस्ति एकं चम्पकं नाम अरण्यम्। अरण्ये चित्राङ्गो नाम मृगः एकाक्षो नाम काकश्च स्नेहेन निवसतः स्म। एकदा चित्राङ्गः वने भ्रमन् केनापि शृगालेन अवलोकितः। क्षुद्रबुद्धिः नाम सः शृगालः स्वार्थहेतुना मृगेण सह मित्रताम् ऐच्छत्। अस्तङ्गते सवितरि क्षुद्रबुद्धिः मृगेण सह मृगस्य निवासस्थानं गतः। मृगशृगालौ दृष्ट्वा काकोऽवदत्, “सखे चित्राङ्ग! कोऽयं द्वितीयः?” मृगः अब्रूत, “जम्बूकोऽयम्। अस्मत्सख्यम् इच्छति।” काकः उपादिशत्, “अकस्मादागन्तुना सह मित्रता न युक्ता।” तदाकर्ण्य जम्बूकः सकोपम् आह, “मृगस्य प्रथमदर्शने भवानपि अपरिचितः एव आसीत्। यथायं मृगः मम बन्धुः तथा भवानपि।” मृगः अब्रवीत्, “अलं विवादेन। वयं सर्वे आनन्देन एकत्र निवसामः।” काकेनोक्तम्, “ एवमस्तु।”

**1. अवबोधनम्। (3 तः 2)** **2**

**क. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।** 1

शृगालः मृगेण सह सख्यम् इच्छति यतः ..............................।

(1) शृगालः मृगमांसं खादितुम् इच्छति।

(2) शृगालः मृगे स्निह्यति।


**ख. कः कं वदति?** 1

“अस्मत्सख्यम् इच्छति।”

**ग. अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत।** 1

मृगशृगालौ दृष्ट्वा <u>काकः</u> अवदत्।

**2. गद्यांशं पठित्वा जालरेखाचित्रं पूरयत।** **2**



**इ. गद्यांशं पठित्वा सरलार्थं लिखत। (2 तः 1)** [4]

1. शक्रः – (कर्णमुपगम्य) भोः कर्ण, महत्तरां भिक्षां याचे।
   कर्णः – दृढं प्रीतोऽस्मि भगवन्। एषोऽहं नमस्करोमि।
   शक्रः – (आत्मगतम्) किं नु खल्वहं वदामि? यदि दीर्घायुर्भवेति वदेयम् दीर्घायुर्भवेत्। यदि न वदेयम्, मूढ इति मां परिभवति। तस्माद् उभयं परिहृत्य किं नु खलु भाषे? भवतु, दृष्टम्।

2. नदी (विपाट्) – किम्? एषः मर्त्यः माम् माता इति सम्बोधयति?
   नदी (शुतुद्री) – कथं माता न करोति साहाय्यं स्वपुत्रस्य? साधु मानवश्रेष्ठ साधु! किन्तु, कच्चित् तव वंशजाः मनुजाः तवेदं वचनं विस्मरिष्यन्ति?
   विश्वामित्रः – न हि मातः, नैतत् शक्यम्।

**ई. माध्यमभाषया उत्तरं लिखत। (2 तः 1)** [2]

1. धरित्र्याः उपदेशं मनसि निधाय पृथुवैन्यः किं किम् अकरोत्?
2. दुष्यन्तस्य कानि स्वभाववैशिष्ट्यानि ज्ञायन्ते?

## तृतीयः विभागः- पद्यम्। (10)

**3. अ. पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। (5 तः 4)** [4]

यथैव सकला नद्यः प्रविशन्ति महोदधिम् ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः।। १।।

षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः।। २।।

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन गुणेन कर्मणा।। ३।।

अयं न भक्तो न च पूजको वा
घण्टां स्वयं नादयते तथापि।
धनं जनेभ्यः किल याचतेऽयम्।
न याचको वा न च निर्धनो वा।। ४।।

**क. पूर्णवाक्येन उत्तरं लिखत।** 1

कनकपरीक्षा कथं भवति?

**ख. विशेषण-विशेष्ययोः मेलनं कुरुत।** 1

| | 'अ' | 'आ' |
|---|---|---|
| (1) | सकलाः | स्वराः |
| (2) | षड्जमूलाः | धर्माः |
| | | नद्यः |

**ग. जालरेखाचित्रं पूरयत।** 1

लोकयानवाहकः

- न भक्तः
- न.............................
- न .............................
- न याचकः

**घ. पद्यांशात् २ प्रथमा-विभक्त्यन्तपदे लिखत।** 1

**च. पूर्वपदं / उत्तरपदं लिखत।** 1

1. यथैव = यथा + ........................ । 2. याचतेऽयम् = ........................ + अयम्।

**आ. पद्ये शुद्धे पूर्णे च लिखत। (3 तः 2)** [4]

1. वैद्यराज ........................ धनानि च।। 2. घटं भिन्द्यात् ........................ भवेत्।।
3. उत्तमौ ........................ प्रजायते।।

**इ. माध्यमभाषया सरलार्थं लिखत। (2 तः 1)** [2]

1. वृथाभ्रमणकुक्रीडापरपीडापभाषणैः।
कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत्।।

2. एकीभूय यथा सर्वे वर्णा गच्छन्ति शुक्लताम्।
तथा सम्भूय शंसन्ति धर्मा मानवतागुणम्।।

## चतुर्थः विभागः- भाषाभ्यासः (10)

**4. अ. पृथक्करणम्।** [4]

1. **मञ्जूषातः नामानि सर्वनामानि च पृथक्कुरुत। (5 तः 4)** 2

| नाम | सर्वनाम |
|---|---|
| | |

(**मञ्जूषा** — राजा, अहम्, सर्वे, कर्षकः, भिक्षाम्)

2. **मञ्जूषातः क्रियापदानि धातुसाधित-विशेषणानि च पृथक्कुरुत। (5 तः 4)** 2

| क्रियापदम् | धातुसाधित-विशेषणम् |
|---|---|
| | |

(**मञ्जूषा** — मन्यते, सेवमानः, गमनीयः, कथयति, पतिता)

**आ. निर्दिष्टाः कृतीः कुरुत। (4 तः 2)** [4]

**1. सङ्ख्या / क्रम / आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत। (3 तः 2)** 2

क. ........................ महिलाः जलम् आहर्तुं गच्छन्ति। (तिस्रः / त्रीणि)

ख. पौषमासः संवत्सरस्य ........................ मासः। (दशः / दशमः)

ग. तेन ........................ प्रयोगः कृतः। (त्रीणि / त्रिवारं)

**2. समासविग्रहाणां समासनामभिः सह मेलनं कुरुत। (6 तः 4)** 2

| समासविग्रहः | समासनाम |
|---|---|
| (1) परागस्य कणाः। | इतरेतर-द्वन्द्वः। |
| (2) न योग्यम्। | षष्ठी-तत्पुरुषः। |
| (3) मृगः च शृगालः च। | कर्मधारयः। |
| (4) परमः अणुः। | उपपद-तत्पुरुषः। |
| (5) कुम्भं करोति इति। | बहुव्रीहिः। |
| (6) महान् भागः यस्य सः। | नञ्-तत्पुरुषः। |

**3. मञ्जूषातः समानार्थकशब्दान्-विरुद्धार्थकशब्दान् चित्वा लिखत। (4 तः 2)** 2

1. कनकम् = ........................... । 2. स्तुतिः × ........................... ।
3. धनम् = ........................... । 4. बद्धः × ........................... ।

(**मञ्जूषा** – निन्दा, वित्तम्, सुवर्णम्, मुक्तः)

**4. योग्यं पर्यायं चिनुत। (3 तः 2)** 2

1. पृथुभूपेन धनुः सज्जीकृतम्। (कर्तृवाच्यम् / कर्मवाच्यम्)
2. त्वं नक्रात् .................... । (त्रायस्व/ त्रायताम्)
3. प्रजाः अतीव .................... आसन्। (कृशः / कृशाः)

**इ. विशिष्ट-विभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (4 तः 2)** [**2**]

1. गम्-गच्छ् (1 प.प.) 2. नमः
3. अलम् 4. दा-यच्छ् (1 प.प.)